# Shri Krishnakritam 3 Shiva Stotram

# શ્રીકૃષ્ણકૃતં ૩ શિવસ્તોત્રમ્

## Document Information

Text title : Shri Krishnakritam 3 Shiva Stotram

File name : kRRiShNakRRitaM3shivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | yuddhakhaNDa | adhyAya 54/43-54||

Latest update : February 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 10, 2025

*sanskritdocuments.org*

Shri Krishnakritam 3 Shiva Stotram

# શ્રીકૃષ્ણકૃતં ૩ શિવસ્તોત્રમ્

શ્રીકૃષ્ણ ઉવાચ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
નમામિ ત્વાઽનન્તશક્તિં સર્વાત્માનં પરેશ્વરમ્ ॥ ૪૩॥

વિશ્વોત્પત્તિસ્થાનનાશહેતું સજ્જ્ઞપ્તિ માત્રકમ્ ।
બ્રહ્મલિઙ્ગં પરં શાન્તં કેવલં પરમેશ્વરમ્ ॥ ૪૪॥

કાલો દૈવં કર્મ જીવસ્સ્વભાવો દ્રવ્યમેવ ચ ।
ક્ષેત્રં ચ પ્રાણ આત્મા ચ વિકારસ્તત્સમૂહકઃ ॥ ૪૫॥

બીજરોહપ્રવાહસ્તુ ત્વન્માયૈષા જગત્પ્રભો ।
તન્નિબન્ધં પ્રપદ્યેહ ત્વામહં પરમેશ્વરમ્ ॥ ૪૬॥

નાના ભાવૈર્લીલયૈવ સ્વીકૃતૈર્નિર્જરાદિકાન્ ।
નૂનં બિભર્ષિ લોકેશો હંસ્યુન્માર્ગાન્સ્વભાવતઃ ॥ ૪૭॥

ત્વં હિ બ્રહ્મ પરં જ્યોતિર્ગૂઢં બ્રહ્મણિ વાઙ્મયે ।
યં પશ્યન્ત્યમલાત્માનમાકાશમિવ કેવલમ્ ॥ ૪૮॥

ત્વમેવ ચાદ્યઃ પુરુષોઽદ્વિતીયસ્તુર્ય આત્મદૃક્ ।
ઈશો હેતુરહેતુશ્ચ સવિકારઃ પ્રતીયસે ॥ ૪૯॥

સ્વમાયયા સર્વગુણપ્રસિદ્ધ્યૈ ભગવન્પ્રભો ।
સર્વાન્વિતઃ પ્રભિન્નશ્ચ સર્વતસ્ત્વં મહેશ્વર ॥ ૫.૫૪.૫૦॥

યથૈવ સૂર્યોઽપિહિતશ્છાયારૂપાણિ ચ પ્રભો ।
સ્વચ્છાયયા સઞ્ચકાસ્તિ હ્યયં પરમદૃગ્ભવાન્ ॥ ૫૧॥

ગુણેનાપિહિતોઽપિ ત્વં ગુણે નૈવ ગુણાન્ વિભો ।
સ્વપ્રદીપશ્ચકાસ્સિ ત્વં ભૂમન્ ગિરિશ શઙ્કર ॥ ૫૨॥

ત્વન્માયામોહિતધિયઃ પુત્રદારગૃહાદિષુ ।

ઉન્મજ્જન્તિ નિમજ્જન્તિ પ્રસક્તા વૃજિનાર્ણવે ॥ ૫૩॥

દૈવદત્તમિમં લબ્ધ્વા નૃલોકમજિતેન્દ્રિયઃ ।
યો નાદ્રિયેત ત્વત્પાદૌ સ શોચ્યો હ્યાત્મવઞ્ચકઃ ॥ ૫૪॥

ત્વદાજ્ઞયાહં ભગવાન્બાણદોશ્છેત્તુમાગતઃ ।
ત્વયૈવ શપ્તો બાણોઽયં ગર્વિતો ગર્વહારિણા ॥ ૫૫॥

નિવર્ત્તસ્વ રણાદ્દેવ ત્વચ્છાપો ન વૃથા ભવેત્ ।
આજ્ઞાં દેહિ પ્રભો મે ત્વં બાણસ્ય ભુજકૃન્તને ॥ ૫૬॥

ઇતિ શિવપુરાણે રુદ્રસંહિતાયાં યુદ્ધખણ્ડે ચતુઃપઞ્ચાશત્તમાધ્યાયાન્તર્ગતં
શ્રીકૃષ્ણકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

શિવપુરાણ । રુદ્રસંહિતા । યુદ્ધખણ્ડ । અધ્યાય ૫૪/૪૩-૫૪॥

shivapurANa . rudrasaMhitA . yuddhakhaNDa . adhyAya 54/43-54..

Proofread by PSA Easwaran

*Shri Krishnakritam 3 Shiva Stotram*

pdf was typeset on February 10, 2025

Please send corrections to *sanskrit@cheerful.com*